# RAMAKRISHNA MISSION VIDYAMANDIRA
(Residential Autonomous College affiliated to University of Calcutta)

**SECOND YEAR [2016-19]**
**B.A./B.Sc. THIRD SEMESTER (July – December) 2017**
**Mid-Semester Examination, September 2017**

Date : 12/09/2017 **SANSKRIT (Honours)**
Time : 11 am – 1 pm Paper : III Full Marks : 50

1. कामजव्यसने मनुमुनिमतं कुल्लूकमनुसृत्योपस्थाप्यताम् । [10]

2. पद्य**मेकं** वङ्गवाण्यानूद्यताम् । [1×4]
   क) यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
   शूले मत्स्यानिवाभक्ष्यन् दुर्बलान् बलवत्तराः ॥
   ख) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
   महती देवता ह्येषा नररूपेण तिष्ठति ॥

3. साहित्यदर्पणानुसारमलंकार**द्वय**स्वरूपं सोदाहरणं निरूप्यताम् । [2×5]
   क) मालोपमा ख) परिणामः ग) यमकम् घ) पुनरुक्तवदाभासः

4. व्याख्यायताम् – “रीतिरात्मा काव्यस्य” इति । [10]

5. एकैकेन वाक्येन **प्रश्नाष्टकं** समाधेयम् । [8×2]
   क) अर्थशास्त्रे कति अध्यायाः सन्ति ? कति चाधिकरणानि ?
   ख) कौटिल्यमतानुसारं विद्याः कतिविधाः ? कास्ताः ?
   ग) शुक्रशिष्याणां नयानुसारं का खल्वेकैव विद्या ? कथम् ?
   घ) वेदाङ्गानि कानि ?
   ङ) भूतरक्षणं कस्य स्वधर्मः ? प्रतिग्रहश्च कस्य ?
   च) कौटिल्यमतानुसारं सर्ववर्णाश्रमसाधारणा धर्माः के ?
   छ) **व्यवस्थितार्यमर्यादः** कृतवर्णाश्रमस्थितिः ।
   त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ॥--अत्रोद्धरणे निम्नरेखाङ्कितपदे सविग्रहं समासो निर्णेयः।
   ज) का नाम वार्त्ता ? कथं सोपकारिकी ?
   झ) तीक्ष्णदण्डे कौटिल्यमतं किमस्ति ? मृदुदण्डे च किम् ?
   ञ) कीदृशो दण्डः प्रजा धर्मार्थकामैर्योजयति ?
   ट) **बलीयान्** अबलं हि ग्रसते ... इत्यत्र निम्नरेखाङ्कितपदस्य का व्युत्पत्तिः ?
   ठ) ... लोको **राज्ञा** दण्डेन पालितः ... इत्यत्र निम्नरेखाङ्कितपदे सकारणं विभक्तिर्निर्णेया ।

———— × ————